P.V.G.'s

# Muktangan English School & Jr. College, Pune - 9

## Annual Examination (2024-25)

## Standard - IX

| | |
|---|---|
| Subject - Sanskrit (Entire) | Marks - 80 |
| Date - 27/03/2025 | Time : 8.00 am to 11.00 am |

### प्रथम : विभाग : सुगमसंस्कृतम् (५)

**प्रश्न १ (अ) चित्रं दृष्ट्वा नामानि लिखत । (५ तः ४)** **(१)**

१) 

२) 

३) 

४) 

५) 

**(आ) सङ्ख्या अक्षरैः / अङ्कैः वा लिखत । (३ तः २)** **(१)**

१) ५९ – २) ३० – ३) चतुर्दश –

**(इ) अक्षरैः समयलेखनं कुरुत । (३ तः २)** **(२)**

१) ६.२० – २) २.५० – ३) ८.१५ –

# द्वितीय : विभाग : गद्यम (२१)

**प्र. २ (अ) गद्यांशं पठित्वा निर्विष्टा कृती: कुरुत ।**

(छात्रा: ग्रन्थालये विविधानि पुस्तकानि पश्यन्ति अध्यापिका प्रश्नान् च पृच्छन्ति।




नयन – आचार्ये, का एषा भिन्ना विशाला कपाटिका? अहो! कियन्त: विविधा: कोषा: एतस्यां वर्तन्ते!

अध्यापिका – आम्, सर्वेषां शास्त्राणाम् अध्ययनार्थम् एते कोषा: आवश्यका:।

सुमेधा – कोष: नाम किम्?

अध्यापिका – कोष: नाम सङ्ग्रह। यथा वयं वित्तकोषे धनस्य सङ्ग्रहणं कुर्म: तथैव भाषाकोषे शब्दानां सङ्ग्रह: भवति।

श्रेया – क: तस्य उपयोग:?

अध्यापिका – सुयोग्य: प्रश्न:। सम्भाषणै लेखन च भाषाप्रभुत्व-प्राप्तर्थं तथैव नैकेषां विषयाणां ज्ञानप्राप्त्यर्थं शब्दसम्पत्ते: सङ्ग्रहणम् अतीव आवश्यकम् । अस्माकं ग्रन्थालये संस्कृतिकोषा:, चरित्रकोषा:, विश्वकोषा: सुभाषितकोषा: च इत्यादय: बहव: कोषा: वर्तन्ते। तेषु 'अमरकोष:' नाम कश्चन विशेष: कोष: ।

**क) एकवाक्येन उत्तरत । (३ त: २)** **(२)**

१) छात्रा: कुत्र विविधानि पुस्तकानि पश्यन्ति?

२) भिन्नायां कपाटिकायां के वर्तन्ते?

३) कोष: नाम किम्?

**ख) सत्यं वा असत्यं इति वाक्यं पुनर्लिखित्वा लिखत ।** **(१)**

सर्वेषां शास्त्राणाम् अध्ययनार्थं कोषा: आवश्यका: ।

**ग) गद्यांशत: विशेषणं चित्वा लिखित।** **(१)**

_______________ , _______________ कपाटिका।

**घ) सूचनानुसारं कृती: कुरुत । (४ त: ३)** **(३)**

१) वर्णविग्रह: कुरुत। भाषाकोष ---------------।

२) गद्यांशात: 'अध्यापिका' इति शब्दस्य कृते **समानार्थक शब्दं** चिनुत।

३) गद्यांशात: द्वे **सर्वनामरुपाणि** लिखत।

४) छात्रा: अध्यापिकां प्रश्नान् पृच्छन्ति।- **लकारं लिखत** ।

**प्रश्न २ आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**



सः अचिन्तयत् – ''यत्परिपूर्णोऽयं घटस्तावत् सक्तुपिष्टेन वर्तते। यदि दुर्भिक्षं भवति तर्हि अस्य विक्रयेणन रूप्यकाणां शतं प्राप्स्यामि। ततस्तेन अहम् अजाद्वयं क्रेष्यामि । ततः षाण्मासिक–प्रसववशात् ताभ्यां यूथः भविष्यति। ततोऽजाभिः प्रभूताः धेनूः ग्रहीष्यामि, धेनुभिः महिषीः, महिषीभिः वडवाः, वडवाप्रसवतः प्रभूताः अश्वाः भविष्यन्ति। तेषां विक्रयणात्प्रभूतं सवर्णं प्राप्स्यामि। सुवर्णेन चतुःशालं गृहं सम्पत्स्यते। ततः कश्चित् धनिकः प्राप्तवयस्कां रूपाढ्यां कन्यां मह्यं दास्यति । आवयोः पुत्रः भविष्यति। तस्याहं सोमशर्मेति नाम करिष्यामि। ततः सः जानुचलनयोग्यः भविष्यति। एकदा सोमशर्मा मां दृष्ट्वा मत्समीपम् आगमिष्यति। ततोऽहं कोपविष्टः अभिधास्यमि भार्याम्, ''गृहाण बालकम्'' इति। साऽपि मम वचनं न श्रोष्यति। तावत्काले कश्चन कुक्कुरः तत्र आगमिष्यति। सोमशर्मा तस्मात् भीतः भविष्यति। ततोऽहं समुत्थाय लगुडेन तं कुक्कुरं ताडयिष्यामि।'' एवं स्वप्नमग्नः ध्यानस्थितः सः तथैव लगुडप्रहारम् अकरोत्। तेन लगुडप्रहारेण सक्तुपिष्टेन पूर्णः सः घटः भग्नः अभवत्। स्वभावकृपणः सः पाण्डुरताम् अगच्छत् । अतः ब्रवीमि –

अनागतवतीं चिन्तामसम्भाव्यां करोति यः।
स एव पाण्डुरः शेते सोमशर्मपिता यथा ।।

**क) एकवाक्येन उत्तरत । (३ तः २)** **(२)**

१) स्वभावकृपणः स्वपुत्रस्य नाम किं करिष्यति ?

२) सोमशर्मा कस्मात् भीतः भविष्यति ?

३) स्वभावकृपणः केन कुक्कुरं ताडयिष्यति ?

**ख) वाक्यं पुनर्लिखित्वा सत्यम् असत्यं वा इति लिखत।** **(१)**

स्वभावकृपणः पुत्रस्य 'सोमशर्मा इति नाम करिष्यति ।

**ग) गद्यांशात् प्रयुक्तनि लृट्लकारस्य द्वेरूपाणि लिखत।।** **(१)**

**घ) अधोरेखित पदम् अनुसृत्य प्रश्ननिर्माणं कुरुत।** **(१)**

स्व<u>भावकृपण</u>ः पाण्डुरताम् अगच्छत् ।

**च) अमरकोषात् शब्दं योजयित्वा वाक्यं पुनर्लिखत।** **(१)**

आवयोः <u>पुत्रः</u> भविष्यति।

**छ) उचितं पर्यायं चिनुत।** **(१)**

१) स्वभावकृपणस्य भार्या तस्य वचनं ____________________।

(श्रोष्यति / न श्रोष्यति )

२) स्वप्ने भिक्षुकः ____________________ ताडयिष्यति ।

(अजाम् / कुक्कुरम्)

**प्रश्न २ इ) गद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत।** **(५)**

**शाहिर :** सा गतां परं तीरम् । रसा सा अधोमुखी भूता । लज्जया म्लानमुखी जाता।
क्षुद्रया बुथं पराभूता । पश्यति क्षुद्रशुनीं सरमाम्।

**गायकवृन्द :** पश्यति क्षुद्रशुनी सरमाम्

**गद्यम् :** हे जी जी जी जी जी ।।
एवं सरमा परतीरं प्राता ।
इत: पश्यति, तत: पश्यति
वलं पृच्छति, गुहां प्रविशति।
गुहायां पणिभर्यद् रुध्दं प्रभो: गोधजसर्वस्वम् ।
सनात्ममन्वेषणकार्यं, समाप्तमन्वेषण कार्यम् ।।

**अथवा**

आत्रेयी: अस्मिन प्रदेशे बहव: अगस्त्यादय: मुनय: निवसन्ति। तेभ्यं वेदान्तविद्याम् अधिगन्तुम् अत्र आगता। वाल्मीकिमहर्षे: आश्रमात् इह आगतास्मि।

वनदेवता: अहो आश्चर्यम्! अन्ये मुनय: वेदान्तज्ञानार्थं वाल्मीकिम् ऋषिम् उपगच्छन्ति। कथम् अत्रभवती तस्य आश्रमात् इह आगतास्मि। अत्र अटति ?

**प्रश्न २ ई) माध्यमभाषया उत्तरं लिखत। (२ त: १)** **(२)**

१) मनस: स्वच्छताविषये माता श्यामं कथं बोधितवती ?

२) 'अपि दिवास्वप्नदर्शनं योग्यम् ?' इति कथाया: आधारेण लिखत।

## तृतीय : विभाग : पद्यम् (१६)

**प्रश्न ३ अ)**

**१)** न तस्यादिर्न तस्यान्त: यो मध्ये तस्य तिष्ठति।
तवाप्यस्ति ममाप्यास्ति यो जानाति स पण्डित:।।

**१) एक वाक्येन उत्तरत।** **(१)**

प्रहेलिकाया: उत्तरं किम् ?

**२) लकारं लिखत।** **(१)**

य <u>जानाति</u> स: पण्डित:।

**३) सन्धिविग्रहं कुरुत ।** **(१)**

तस्यादि: = तस्य + ____________ ।

तस्यान्त: = तस्य + ____________ ।

२)  ते शतं हि वयं पञ्च स्वकीये विग्रहे सति ।

परैस्तु विग्रहे प्राप्ते वयं पञ्चाधिकं शतम् ।

**१) जालचित्रं पूरयत** **(२)**




**२) विशेषणं - विशेष्यम् मेलनं कुरुत ।** **(१)**

| **अ** | **आ** |
|---|---|
| ते | स्वकीये |
| वयम् | शतम् |
| | पञ्च |

**प्रश्न ३ आ) पद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत (२ तः १)** **(२)**

१) पठक: पाठकश्चैव ये चान्ये शास्त्रवाचका: ।

सर्वे व्यसनिनो ज्ञेया: य: क्रियावान्स पण्डित:।।

२) अयं निज: परो वेति गणना लघुचेतसाम् ।

उदारचरितानां तु वसुधैव कुटुम्बकम् ।।

**प्रश्न ३ इ) रिक्तस्थानानि पूरयित्वा अन्वयं पुनर्लिखत।** **(२)**

दृष्टिपूतं पादं ______________ । वस्त्रपूतं जलं ______________।

सत्यपूतां वाणीं ______________ । मन:पूतं ______________ ।

**प्रश्न ३ उ) श्लोकौ पूर्णौ शुद्धौ च लिखत। (३ तः २)** **(४)**

१) यत्र नार्यस्तु ------------------- ।।

२) तातेन कथितं ---------------------।।

३) गङ।याश्चञ्चलतरे ---------------------।।

**प्रश्न ३ उ) माध्यमभाषया उत्तरं लिखत। (२ तः १)**

**प्रस्तावना अपेक्षिता (केवलम् १)** **(२)**

१) सरमा कर्तव्यपालने विघ्नान् कथं तरति ?

२) लघुचेतसः जनाः कथम् अभिज्ञातव्याः ?

## चतुर्थः विभागः लेखनकौशलम् (१६)

**प्रश्न ४ अ) निबन्धं पूरयत** **(५)**

सर्वखगेषु मयूरः अतीव ______ खगः। तस्य कण्ठः नीलः अतः सः नीलकण्ठः______ । मयूरस्य कलापः विविधवर्णयुक्तः मनोहरः च। यदा आकाशे ______ आगच्छन्ति तदा सः कुलापं ______ आनन्देन नृत्यति। तस्य मस्तके शिखा मुकुटः इव राजते । तस्य केका प्रसिद्धा। मयूरः ______ शारदायाः वाहनम् अस्ति।

**(कुरुपः मेघाः, देवी, प्रसारयति, सुन्दरतमः, उच्यते।)**

**प्रश्न ४ आ) अव्ययानां / धातूनाम् उपयोगं कृत्वा वाक्यानि लिखत (४ तः २)** **(२)**

१) कृते – २) गम् –

३) अलम् – ४) रूच् –

**प्रश्न ४ इ) सङ्ख्याविशेषणानाम् उपयोगं कृत्वा रिक्तस्थानानि पूरयत। (४ तः ३)** **(३)**

१) ____________________ (१) दासी सन्देशं कथितवती ।

२) ____________________ (२) पुस्तके ।

३) ____________________ (३) बालकाः।

४) ____________________ (५) नाणकानि सन्ति।

**प्रश्न ४ ई) संस्कृतानुवादं कुरुत। (६ तः ४)** **(४)**

1) She goes to school at 7.30 am.

2) Answer in Sanskrit.

3) A cat drinks milk.

4) You stand up.

5) There are 50 Students in my class.

**अथवा**

**प्रश्न ४ ई) मञ्जूषातः शब्दान् प्रयुज्य चित्रवर्णनं कुरुत। (४ वाक्यानि)**



**(मञ्जूषा – सरोवरः, कमलानि, पुष्पाणि, जलम्, वृक्षः, खगाः, कूजन्ति, विकसन्ति, मनोरमम्, बकाः, वर्तकाः तरन्ति)**

**प्रश्न ४ ऊ) अमरकोषात् समानार्थक शब्दं योजयित्वा वाक्यं पुनर्लिखत। (३तः २)** **(२)**

१) <u>नृपः</u> सेवकम् आदिशत्।

२) शुभ <u>दिनम्</u>

३) <u>मीनः</u> जले तरति।

## पञ्चम : विभाग : व्याकरणम् (१४)

**प्रश्न ५ अ) तालिकां पूरयत।** **(६)**

१) नामतालिकां पूरयत। (६ तः ४) **(२)**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| पयः | ________ | ________ | द्वितीया |
| ________ | सरितोः | ________ | षष्ठी |
| ________ | ________ | जगत्सु | सप्तमी |

२) सर्वनाम तालिकां पूरयत। (६ तः ४) **(२)**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| इदम् | ________ | ________ | प्रथमा |
| ________ | आभ्याम् | ________ | पञ्चमी |
| ________ | ________ | भवतीषु | सप्तमी |

३) धातु–तालिकां पूरयत। (६ तः ४) **(२)**

**(लोट्लकर) प.प.**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| ________ | ________ | पठन्तु | प्रथमः पुरुषः |
| पठ | ________ | ________ | मध्यमः परुषः |
| ________ | पठाव | ________ | उत्तम पुरुषः |

**प्रश्न ५ अ) सूचनानुसारं कृतीः कुरूत। (५ तः ३)** **(३)**

१) सोमशर्मा मम समीपम् आगमिष्यति ।

**('मम' स्थाने 'पितृ' शब्दस्य योग्य रूपं लिखत।)**

२) **वाक्यं एकवचने लिखत।**

वयं प्रतिदिनं प्रयतामहे ।

३) **प्रयोगपरिवर्तनं कुरुत ।**

माता कथां कथयति ।

४) **ल्यबन्तअव्ययं निष्कासयत।**

रान: गृहम् आगम्य भोजनं करोति ।

५) **'त्वं' कर्तृपदं योजयत ।**

भवान् उपचारं करोतु ।

**प्रश्न ५ इ) समास-स्तम्भमेलनं कुरुत ।** **(३)**

| अ | ब |
|---|---|
| १) दानपेटिका | षष्ठी तत्पुरुष: |
| २) मत्स्यमण्डूकौ | पञ्चमी तत्पुरुष: |
| ३) वृक्षपतितम् | चतुर्थी तत्पुरुष: |
| ४) दशरथपुत्र: | इतरेतर द्वन्द्व: |
| ५) मूषकमार्जारम् | तृतीया तत्पुरुष: |
| ६) चरणविकल | समाहार: द्वन्द्व: |

**प्रश्न ५ ई) वाक्यं शुद्धं कुरुत । (३ त:२)** **(२)**

१) छात्रा: ग्रन्थालये विविधं पुस्तकानि पश्यन्ति।

२) सा बालक: भोजनं करोति।

३) अमरकोषे तिस्त्र: काण्डानि सन्ति।

## षष्ठ: विभाग: अपठितम् (८)

**प्रश्न ६ अ) गद्यांशं पठित्वा कृती: कुरूत। (६ त: ४)** **(४)**

भारतवर्ष: कृषिप्रधान: देश:। अत्र नैके जना: ग्रामेषु निवसन्ति। कृषका: कृषि-कार्यं कुर्वन्ति अन्नानि च उत्पादयन्ति। अन्नं विना कुत: जीवनम्? कृषिकार्यं विना कथम् अन्नानाम् उत्पादनं भवेत्? अत: ग्रामाणां कृषकाणां च महत्त्वम्। केचित् ग्रामीणा: स्वे स्वे गृहे स्थित्वा कार्याणि कुर्वन्ति। वस्तुत: ग्राम्य-जीवनम् अति कठिनम्। परं ग्रामीण: अल्पेन एवं सन्तुष्य: भवन्ति ।

**१) पूर्णवाक्येन उत्तरत ।**

भारतवर्ष: कीदृश: देश:।

२) गद्यांशात् प्रथमा-विभक्त्यन्तपदं चित्वा लिखत । **(केऽपि द्वे)**

३) **प्रातिपादिकं लिखत।**

१) ग्रामेषु–　　　　　　　　　　　　２) कृषकाणाम् –

४) **सत्यं / असत्यं वा इति लिखत!**

कृषिकार्यं विना अन्नानाम् उत्पादनं भवेत् ।

५) **माध्यमभाषया सरलार्थं लिखत।**

अत्र नैके जना: ग्रामेषु निवसन्ति।

६) **वर्णविग्रहं कुरुत ।** कृषक --------------------।

**प्रश्न ६ आ) पद्यांशं पठित्वा निर्दिष्टे कृतीः कुरूत। (६ तः ४)** **(४)**

उमादेवी यस्य माता शङ्करश्च तथा पिता।
मूषको वाहनं यस्य स मां पातु गजानन ।।

**क) पूर्णवाक्येन उत्तरं लिखत । (३ तः २)** **(२)**

१) गजाननस्य पिता क: ?

२) गजाननस्य माता का ?

३) मूषक: कस्य वाहनम् ?

**ख) जालरेखाचित्रं पूरयत । (३ तः २)** **(२)**




■■■